# पतञ्जलियोगसूत्रम्

## ॥ प्रथमोऽध्यायः ॥

## ॥ समाधि-पादः ॥

अथ योगानुशासनम् ॥ १.१ ॥

योगश्चित्तवृत्तिनिरोधः ॥ १.२ ॥

तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥ १.३ ॥

वृत्तिसारूप्यमितरत्र ॥ १.४ ॥

वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः ॥ १.५ ॥

प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥ १.६ ॥

प्रत्यक्षानुमानागमाः प्रमाणानि ॥ १.७ ॥

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥ १.८ ॥

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥ १.९ ॥

अभावप्रत्ययालम्बना वृत्तिर्निद्रा ॥ १.१० ॥

अनुभूतविषयासम्प्रमोषः स्मृतिः ॥ १.११ ॥

अभ्यासवैराग्याभ्यां तन्निरोधः ॥ १.१२ ॥

तत्र स्थितौ यत्नोऽभ्यासः ॥ १.१३ ॥

स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ॥ १.१४ ॥

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥ १.१५ ॥

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ॥ १.१६ ॥

वितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञातः ॥ १.१७ ॥
(स्मितास्वरूपानुगमात्, स्मितानुगमात्)

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ॥ १.१८ ॥

भवप्रत्ययो विदेहप्रकृतिलयानाम् ॥ १.१९ ॥

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ॥ १.२० ॥

तीव्रसंवेगानामासन्नः ॥ १.२१ ॥

मृदुमध्याधिमात्रत्वात् ततोऽपि विशेषः ॥ १.२२ ॥

ईश्वरप्रणिधानाद्वा ॥ १.२३ ॥

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥ १.२४ ॥

तत्र निरतिशयं सर्वज्ञबीजम् ॥ १.२५ ॥ (सर्वज्ञत्वबीजम्)

स पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥ १.२६ ॥

तस्य वाचकः प्रणवः ॥ १.२७ ॥

तज्जपस्तदर्थभावनम् ॥ १.२८ ॥

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ॥ १.२९ ॥

व्याधिस्त्यानसंशयप्रमादालस्याविरति-
भ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि
चित्तविक्षेपास्तेऽन्तरायाः ॥ १.३० ॥

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः ॥ १.३१ ॥

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥ १.३२ ॥

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां
भावनातश्चित्तप्रसादनम् ॥ १.३३ ॥

प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ॥ १.३४ ॥

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धिनी ॥ १.३५ ॥

विशोका वा ज्योतिष्मती ॥ १.३६ ॥

वीतरागविषयं वा चित्तम् ॥ १.३७ ॥

स्वप्ननिद्राज्ञानालम्बनं वा ॥ १.३८ ॥

यथाभिमतध्यानाद्वा ॥ १.३९ ॥

परमाणु परममहत्त्वान्तोऽस्य वशीकारः ॥ १.४० ॥

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु
तत्स्थतदञ्जनता समापत्तिः ॥ १.४१ ॥

तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः ॥ १.४२ ॥

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥ १.४३ ॥

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥ १.४४ ॥

सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम् ॥ १.४५ ॥

ता एव सबीजः समाधिः ॥ १.४६ ॥

निर्विचारवैशारद्येऽध्यात्मप्रसादः ॥ १.४७ ॥

ऋतम्भरा तत्र प्रज्ञा ॥ १.४८ ॥

श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥ १.४९ ॥

तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ॥ १.५० ॥

तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ॥ १.५१ ॥

॥ इति पतञ्जलि-विरचिते योग-सूत्रे प्रथमः समाधि-पादः ॥

# ॥ द्वितीयोऽध्यायः ॥
# ॥ साधन-पादः ॥

तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥ २.१ ॥

समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥ २.२ ॥

अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः ॥ २.३ ॥

अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥ २.४ ॥

अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥ २.५ ॥

दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ॥ २.६ ॥

सुखानुशयी रागः ॥ २.७ ॥

दुःखानुशयी द्वेषः ॥ २.८ ॥

स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः ॥ २.९ ॥

ते प्रतिप्रसवहेयाः सूक्ष्माः ॥ २.१० ॥

ध्यानहेयास्तद्वृत्तयः ॥ २.११ ॥

क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥ २.१२ ॥

सति मूले तद्विपाको जात्यायुर्भोगाः ॥ २.१३ ॥

ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥ २.१४ ॥

परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च
दुःखमेव सर्वं विवेकिनः ॥ २.१५ ॥

हेयं दुःखमनागतम् ॥ २.१६ ॥

द्रष्टृदृश्ययोः संयोगो हेयहेतुः ॥ २.१७ ॥

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं
भोगापवर्गार्थं दृश्यम् ॥ २.१८ ॥

विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ॥ २.१९ ॥

द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥ २.२० ॥

तदर्थ एव दृश्यस्यात्मा ॥ २.२१ ॥

कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥ २.२२ ॥

स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥ २.२३ ॥

तस्य हेतुरविद्या ॥ २.२४ ॥

तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम् ॥ २.२५ ॥

विवेकख्यातिरविप्लवा हानोपायः ॥ २.२६ ॥

तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥ २.२७ ॥

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरा विवेकख्यातेः ॥ २.२८ ॥

यमनियमासनप्राणायामप्रत्याहार-
धारणाध्यानसमाधयोऽष्टावङ्गानि ॥ २.२९ ॥

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥ २.३० ॥

जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥ २.३१ ॥

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ २.३२ ॥

वितर्कबाधने प्रतिपक्षभावनम् ॥ २.३३ ॥

वितर्का हिंसादयः कृतकारितानुमोदिता
लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला
इति प्रतिपक्षभावनम् ॥ २.३४ ॥

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ॥ २.३५ ॥

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥ २.३६ ॥

अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ॥ २.३७ ॥

ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥ २.३८ ॥

अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः ॥ २.३९ ॥

शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः ॥ २.४० ॥

सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥ २.४१ ॥

सन्तोषादनुत्तमसुखलाभः ॥ २.४२ ॥

कायेन्द्रियसिद्धिरशुद्धिक्षयात् तपसः ॥ २.४३ ॥

स्वाध्यायाद् इष्टदेवतासम्प्रयोगः ॥ २.४४ ॥

समाधिसिद्धिरीश्वरप्रणिधानात् ॥ २.४५ ॥

स्थिरसुखम् आसनम्  ॥ २.४६ ॥

प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्  ॥ २.४७ ॥

ततो द्वन्द्वानभिघातः  ॥ २.४८ ॥

तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः  ॥ २.४९ ॥

बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः
परिदृष्टो दीर्घसूक्ष्मः  ॥ २.५० ॥

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः  ॥ २.५१ ॥

ततः क्षीयते प्रकाशावरणम्  ॥ २.५२ ॥

धारणासु च योग्यता मनसः  ॥ २.५३ ॥

स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः  ॥
२.५४ ॥

ततः परमा वश्यतेन्द्रियाणाम्  ॥ २.५५ ॥

॥ इति पतञ्जलि-विरचिते योग-सूत्रे द्वितीयः साधन-पादः  ॥